दिनांक 16.5.20 उपशास्त्री प्रथम वर्ष, विषय व्याकरण
ग्रन्थ - सिद्धान्तकौमुदी, अजन्त स्त्रीलिङ्ग प्रकरणम्

1 स्त्रियौ – स्त्री शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम् स्वौजस् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेण स्त्री शब्दात् औ विभक्तौ स्त्रियाः इति सूत्रेण इयङादेशे अनुबन्धलोपे स्त्रियौ इति सिद्धम्।

2 स्त्रियम् – स्त्री शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायां स्वौजस् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेण स्त्रीशब्दात् अम् विभक्तौ, अमि पूर्वः इति पूर्वरूपे प्राप्ते तं प्रबाध्य वाऽम्शसोः इति सूत्रेण वा इयङादेशे स्त्रियम् इति सिद्धम्।

3 स्त्रियै – स्त्री शब्दात् प्रातिपदिक संज्ञायां, स्वौजस् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेण स्त्रीशब्दात् ङे विभक्तौ अनुबन्ध लोपे। यू स्त्र्याख्यौ नदी इति सूत्रेण नदी संज्ञायाम्। आण् नद्याः इति सूत्रेण आडागमे आटश्च इति सूत्रेण वृद्धौ स्त्री ऐ इति दशायां स्त्रियाः इति सूत्रेण इयङादेशे अनुबन्ध लोपे स्त्रियै इति सिद्धम्।

4 क्रोष्ट्री – क्रोष्टु शब्दात् प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहयोगेण क्रोष्टु शब्दात् सु विभक्तौ अनुबन्ध लोपे स्त्रियां च इति सूत्रेण क्रोष्टु स्थाने तृज्वद्भावे क्रोष्टृ सु इति जाते ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप् प्रत्यये अनुबन्धलोपे इको यणचि इति यणे, हल्ङ्याब्भ्यो इति सुलोपे क्रोष्ट्री इति सिद्धम्।

5 स्वसा – स्वसृ शब्दात् प्रातिपदिक संज्ञायां, स्वौजस् इति सूत्रेण सु विभक्तौ अनुबन्ध लोपे। ऋदुशनस्पुरुदंसोऽनेहसां च इति सूत्रेण अनङादेशे अनुबन्ध लोपे। अप्तृन् तृच्… इति सूत्रेण उपधादीर्घे सुलोपे च स्वसा इति सिद्धम्

अमरनाथ मिश्र
स०प्रो० व्याकरण
[illegible]
[illegible]

दिनांक 16.4.20 शास्त्री प्रथम खण्ड, विषय अनिवार्य दर्शन
(केवल व्याकरण विषय छात्रों के लिये)
ग्रन्थ- तर्कसंग्रह

प्रश्न - वाक्यार्थबोधे लक्षणानि तदुदाहरणानि च निरूपयताम् ।

उत्तर - पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकाङ्क्षा । अव्यवहितोत्तरत्वादि सम्बन्धेन यत्पदे यत्पदाविरहप्रयोज्याया शाब्दबोधजनकत्वाभावस्तादृश शाब्दबोधे तत्पदे तत्पदवत्त्वमाकाङ्क्षा लक्षणमिति भावः । यथा घटमानयेति अव्यवहितोत्तरत्व संबन्धेन अम् पदम् घटपदवदिति व्याप्ताऽमपदविशेषेऽस्य घटपद प्रकारकस्य शाब्दबोधस्य घटीयकर्मत्वप्रकारकस्य शाब्दबोधो जायते । अम्-घट इति विपरीतोच्चारणे तु अव्यवहितोत्तरत्व सम्बन्धेनाऽमपदं घटपदवदित्याकारक निरुक्त आकाङ्क्षा विरहात् घटीयं कर्मत्वमिति शाब्दबोधो न जायते, अतो घटीयं कर्मत्वमिति शाब्दबोधे अव्यवहितोत्तरत्व सम्बन्धेन अम्पदं घटपदवदित्याकारकाकाङ्क्षाऽस्य कारणम् । गौरश्वः पुरुषो ~~हस्ती~~ हस्ती शकुनिर्मृगो ब्राह्मणः इत्यादि वाक्याच्च शाब्दबोधः आकाङ्क्षायास्तत्र अभावात् । ईदृशं वाक्यञ्च न प्रमाणम्, आकाङ्क्षाविरहादेव ।

~~अथ~~ अर्थाऽबाधो योग्यता । एकपदार्थेऽपरपदार्थाभावाऽभाववत्त्वं योग्यतेति तदर्थः । यथा जलेन सिञ्चतीत्यत्र सेचनकरणत्वस्य जले बाधाऽभावान्जल करणक सेचनं करोति शाब्दबोधः उत्पद्यते, जलपदार्थे सेचनकरणत्वरूपाऽपरपदार्थाऽभावाऽभावनिश्चयरूपयोग्यतायाः सत्त्वात् । अग्निना सिञ्चतीत्यत्र सेचनकरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयस्य सत्त्वान्नवह्निना सिञ्चतीत्यत्र तु सेचनकरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयस्य सत्त्वान्न वह्निना सिञ्चतीति न स्य शाब्दबोधः योग्यताविरहाच्च नेदं वाक्यं प्रमाणम् ।

शुभनामा अमित
एल० पी० व्यास
रा० उ० सं० म० वि०
रुलियाना पूर्णिया

दिनांक 16-9-20

उपशास्त्री द्वितीयवर्ष, विषय व्याकरण
ग्रन्थ- सिद्धान्तकौमुदी, अदादिप्रकरणम्

1 वक्ष्यते - ब्रू धातोर्लृट् लृट्स्थाने तिप्तस्झिसिप् इति सूत्रेण त प्रत्यये सार्वधातुक संज्ञायाम्, शपं प्रबाध्य स्यतासी लृलुटोः इति सूत्रेण स्य प्रत्यये ब्रू स्य त इति जाते। ब्रुवो वचिः इति सूत्रेण ब्रू स्थाने वचादेशे, चोः कुः इति कुत्वे आदेशप्रत्यययोः इति षत्वे, टित आत्मनेपदानां टेरे इति सूत्रे टेरेत्वे सति वक्ष्यते इति सिद्धम्

2 अवोचत् - ब्रू धातोर्लुङ् लुङ्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। इतश्च इति इकार लोपे। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे अनुबन्ध लोपे ब्रुवो वचिः इति ब्रू स्थाने वचादेशे च्लि लुङि इति च्लि प्रत्यये ~~च्लेः सिच् आदेशे अनुबन्ध लोपे~~ ~~अवच्~~ अस्यतिवक्तिख्यातिभ्योऽङ् इति सूत्रेण च्लेः अङादेशे अवच् अत् इति दशायां वच उम् इति सूत्रे वकारोत्तरवर्ति अकारस्य स्थाने उमादेशे अनुबन्ध लोपे गुणे अवोचत् इति सिद्धम्।

3 जुहोति - हु धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायां ~~श. शपं प्रबाध्य~~ ~~जुहोत्यादिभ्यः श्लुः~~ इ प्रत्यये जुहोत्यादिभ्यः श्लुः इति सूत्रेण शप्स्थाने श्लौ। श्लौ इति द्वित्वे, अभ्याससंज्ञायां। हु - हु ति इति जाते, कुहोश्चुः इति श्चुत्वे, अभ्यासे चर्च इति सूत्रेण जश्त्वे। सार्वधातुकत्वात् गुणे जुहोति इति सिद्धम्।

4 जुहुतः - हु धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तस् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायां, शप् प्रत्यये जुहोत्यादिभ्यः श्लुः इति शप्स्थाने श्लौ। श्लौ इति सूत्रेण द्वित्वे अभ्याससंज्ञायाम्, कुहोश्चुः इति श्चुत्वे अभ्यासे चर्च इति सूत्रेण ~~चर्त्वे~~ जश्त्वे। सार्वधातुकत्वात् गुणे प्राप्ते सार्वधातुकमपित् इति सूत्रेण ङित्वद्भावे ङित्वात् गुणनिषेधे सस्य रुत्वे विसर्गे जुहुतः इति सिद्धम्।

अमरनाथ मिश्र
स०प्रा० व्याकरण
रा०उ०सं०म०वि०
सुखजेना पूर्णिया